# Rajasattamebhyah Harina Dattah Svamantrah

# રાજસત્તમેભ્યઃ હરિણા દત્તાઃ સ્વમન્ત્રાઃ

## Document Information

Text title : Rajasattamebhyah Harina Dattah Svamantrah

File name : rAjasattamebhyaHhariNAdattAHsvamantrAH.itx

Category : vishhnu, vishnu, krishna, lakShmInArAyaNIyasaMhitA, mantra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 4 | adhyAya 79/75-91||

Latest update : May 15, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 15, 2026

*sanskritdocuments.org*

# રાજસત્તમેભ્યઃ હરિણા દત્તાઃ સ્વમન્ત્રાઃ

સર્વોત્કૃષ્ટં ગૃહે યદ્યદ્રાજ્યે રાષ્ટ્રે તથોત્તમમ્ ।
તત્તચ્છ્રીકૃષ્ણસેવાયાં ન્યધુસ્તે રાજસત્તમાઃ ॥ ૭૫॥

આરાર્ત્રિકં પ્રચક્રુશ્ચ પપુઃ પાદામૃતં હરેઃ ।
પ્રસાદં ભક્ષયામાસુઃ શ્રીસ્વામિકૃષ્ણહસ્તતઃ ॥ ૭૬॥

સેવયામાસુરત્યર્થં પાદસંવાહનાદિભિઃ ।
એનં પ્રસાદયામાસુર્ભક્ત્યા પદ્માવતીપતિમ્ ॥ ૭૭॥

જગૃહુસ્તે મહામન્ત્રાન્ પ્રજ્ઞાનારાયણાનનાત્ ।
"ૐ નમઃ શ્રીકૃષ્ણનારાયણાય સ્વામિને સ્વાહા" ॥ ૭૮॥

"શરણં શ્રીકૃષ્ણનારાયણોઽસ્તુ મમ સર્વદા ।
કાલમાયાપાપકર્મશત્રુયામ્યકુહૃદ્ભયાત્ ॥ ૭૯॥

શૂલમીનધ્વજધનુશ્ચક્રસ્વસ્તિવાનવ" ।
"બ્રહ્માઽહં શ્રીકૃષ્ણનારાયણભક્તોઽસ્મિ શાશ્વતઃ" ॥ ૮૦॥

"બ્રાહ્મ્યહં શ્રીકૃષ્ણનારાયણદાસી ભવામિ ઓમ્" ।
"ૐ નમઃ શ્રીકૃષ્ણનારાયણાય પતયે સ્વાહા" ॥ ૮૧॥

"અનાદિશ્રીકૃષ્ણનારાયણઃ સ્વામી પતિશ્ચ મે" ।
"બાલકૃષ્ણઃ પરબ્રહ્મ મમ વૈ શાશ્વતઃ પતિઃ ॥ ૮૨॥

પિતા બન્ધુઃ સુહૃન્મિત્રં રક્ષકઃ પોષકોઽસ્તુ સઃ" ।
"બાલકૃષ્ણાય વિદ્મહેઽનાદિકૃષ્ણાય ધીમહિ ।
તન્નઃ શ્રીશઃ પ્રચોદયાત્ ॥ ૮૩॥

"ૐ શ્રીલક્ષ્મ્યૈ મહાલક્ષ્મ્યૈ દુઃખભઙ્ક્ત્ર્યૈ શ્રિયૈ નમઃ" ।
"ૐ માં શ્રીબાલકૃષ્ણાય સમર્પયામિ ૐ નમઃ" ॥ ૮૪॥

"કૃષ્ણનારાયણભક્તોઽહં શ્રીહરિઃ શરણં મમ" ।

“શ્રીકૃષ્ણો વલ્લભઃ સ્વામી શ્રીસ્વામી શરણં મમ” ॥ ૮૫॥

“શ્રીકૃષ્ણઃ શ્રીહરિઃ સ્વામી શ્રીપતિઃ શરણં મમ” ।
“શ્રીકૃષ્ણો વૈષ્ણવાચાર્યઃ પ્રભુઃ પદ્માવતીપતિઃ ॥ ૮૬॥

સ્વામી મે શાશ્વતઃ કાન્તસ્તસ્યાઽહં સ્વામિની પ્રિયા” ।
“પ્રભુઃ કૃષ્ણઃ પારમેશઃ શ્રીકૃષ્ણઃ શરણં મમ” ॥ ૮૭॥

“પ્રભુઃ કૃષ્ણઃ પાર્વણો નારાયણઃ શરણં મમ” ।
એતાન્મન્ત્રાન્ દદૌ કૃષ્ણનારાયણઃ સ્વયં હરિઃ ॥ ૮૮॥

“કૃષ્ણનારાયણ કૃષ્ણનારાયણ નરાયણ ।
અનાદિશ્રીકૃષ્ણનારાયણ રાધારમાયણ ॥ ૮૯॥

“પ્રભો નારાયણ માધવીશ્રીનારાયણ પ્રભો ।
જયાનારાયણ શ્રીલલિતાનારાયણ! વિભો” ॥ ૯૦॥

“કમ્ભરાગોપાલલાલઃ સ્વામી પતિશ્ચ મામવ” ।
એવં મન્ત્રાન્ નામધુન્યં દદૌ ચાપિ સ્વયં હરિઃ ॥ ૯૧॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ તિષ્યસન્તાનાત્મકસ્ય ચતુર્થખણ્ડે
૭૯-અધ્યાયાન્તર્ગતં રાજસત્તમેભ્યઃ હરિણા દત્તાઃ સ્વમન્ત્રાઃ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૪। અધ્યાય ૭૯/૭૫-૯૧॥

lakShmInArAyaNIyasaMhitA . khaNDa 4. adhyAya 79/75-91..

Proofread by PSA Easwaran

---

*Rajasattamebhyah Harina Dattah Svamantrah*

pdf was typeset on May 15, 2026

Please send corrections to *sanskrit@cheerful.com*